## ग्रीष्मवसन्तादन्यतरस्याम्। (४६/१४२१)

ग्रीष्मवसन्तशब्दाभ्याम् अन्यतरस्यां वुञ् प्रत्ययो भवति उप्तेऽर्थे। ऋत्वणोऽपवादः। ग्रीष्मं सस्यम्, ग्रैष्मकम्। वासन्तम्, [1]वासन्तकम्॥

## देयमृणे। (४७/१४२२)

तत्र इत्येव, कालात् इति च। सप्तमीसमर्थात् [2]कालवाचिनः प्रातिपदिकात् देयम् इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, [3]यद् देयमृणं चेत्तद्भवति। [4]मासे देयमृणं मासिकम्। आर्धमासिकम्। सांवत्सरिकम्। ऋणे इति किम्? [5]मासे देया भिक्षा॥

## कलाप्यश्वत्थयवबुसाद् वुन्। (४८/१४२३)

कालात् इत्येव। कलापिन् अश्वत्थ यवबुस इत्येतेभ्यः [6]कालवाचिभ्यः सप्तमीसमर्थेभ्यो देयमृणम् इत्येतस्मिन्नर्थे वुन् प्रत्ययो भवति। कलाप्यादयः शब्दाः साहचर्यात् काले वर्तन्ते। यस्मिन् काले मयूशः कलापिनो भवन्ति स कलापी। यस्मिन्[7]अश्वत्थाः फलन्ति सो[8]ऽश्वत्थः। यस्मिन् [9]यवबुसं [10]सम्पद्यते स यवबुसशब्देनोच्यते। कलापिनि काले देयम् ऋणम् कलापकम्। अश्वत्थकम्। यवबुसकम्॥

## ग्रीष्मावरसमाद् वुञ्। (४९/१४२४)

ग्रीष्म[11]अवरसमशब्दाभ्यां वुञ् प्रत्ययो भवति देयमृणम् इत्येतस्मि[12]न्नर्थे। [13]अण्ठञोरपवादः। ग्रीष्मे देयमृणं ग्रैष्मकम्। आवरसमकम्। प्रत्ययान्तरकरणं वृद्ध्यर्थम्। समाशब्दो वर्षपर्यायः॥

## संवत्सराग्रहायणीभ्यां ठञ् च। (५०/१४२५)

संवत्सराग्रहायणीशब्दाभ्यां[14] ठञ् प्रत्ययो भवति, चकाराद् वुञ् च देयमृणम् इत्येतस्मि[15]न्नर्थे। संवत्सरे देयमृणं सांवत्सरिकम्, सांवत्सरकम्। आग्रहायणिकम्, [16]आग्रहायणकम्। वा इति वक्तव्ये ठञ्ग्रहणं सन्धिवेलादिषु संवत्सरात् फलपर्वणोः इति पठ्यते, तत्र फले ऋणत्वेन विवक्षितेऽणं बाधित्वा ठञेव यथा स्यात् इति[17]॥

---

1. वासन्तिकम् इ. 2. कालविशेषवाचिनः फ. 3. यत्र देयं क. 4. मासदेयम् क. 5. मासदेया क. 6. शब्देभ्यः इत्यधिकम् फ, कालविशेषवाचिभ्यः ब. क. फ. 7. काले इत्यधिकम् ब. फ. 8. आश्वत्थः फ. 9. काले इत्यधिकम् फ. 10. उत्पद्यते फ. ह. 11. °अवरसमाभ्यां शब्दाभ्यां क. 12. अर्थे नास्ति फ, विषये ब. 13. अणञोः ह. 14. सप्तमीसमर्थाभ्याम् इत्यधिकम् ड. 15. विषये ब. क. इ. 16. आग्रहायणम् ह. 17. एवमर्थं ठञ्ग्रहणम इत्यधिकम ह.